सुरगिरिरिव देवैः सर्वदा सेव्यपादः।
जलनिधिरिव शश्वत् सर्व्वसत्वानुकम्पी
गणभृदजनि शिष्यो मौलिनामा तदीयः ॥७॥

* पंचायती मन्दिर देहलीमें इस ग्रन्थकी दो प्रतियाँ हैं—एक सं० १५८४ की लिखी हुई, जिसमें प्रशस्तिके इस * चिन्ह तक कुल तीन ही पद्य हैं, दूसरी सं० १७६६ को लिखी हुई है जिसमें ६ पद्य हैं; परन्तु आदिके उक्त तीन पद्योंको छोड़कर शेष ६ पद्योंमें जो प्रशस्ति है वह एक जुदी तथा अधूरी जान पड़ती है—ग्रन्थकर्ताके साथ उसका सम्बन्ध व्यक्त नहीं होता।

कलाविलासः परिपूर्णवृत्तो दिगम्बरालंकृतिहेतुभूतः ।
श्रीनन्दिसूरिर्मुनिवृन्दवन्द्यस्तस्मादभूच्चन्द्रसमानकीर्तिः ॥८॥

चार्वाक-बौद्ध-जिन-साङ्ख्य-शिवद्विजानां,
वाग्मित्व-वादि-गमकत्व-कवित्व-वित्तः ।
साहित्य-तर्क-परमागम-भेदभिन्नः,
श्रीनन्दिसूरिगगनाङ्गणपूर्णचन्द्रः ॥९॥

इति समाप्तोऽयं पुण्याश्रवाभिधो ग्रंथः ।

[देहली पंचायती मन्दिर प्रति

१०४. प्रा० पंचसंग्रह-टीका (भ० सुमतिकीर्ति)

आदिभाग :—

.... ॥१॥

अन्तभाग :—

श्रीमूलसंघेऽजनि नन्दिसंघो वरो बलात्कारगणप्रसिद्धः ।
श्रीकुंदकुंदो वरसूरिवर्यो बभौ बुधो भारतिगच्छसारे ॥१॥
तदन्वये देवमुनीन्द्रवंद्यः श्रीपद्मनन्दी जिनधर्म्मनंदी ।
ततो हि जातो दिविजेन्द्रकीर्तिर्विद्या[दि]नंदी वरधर्म्ममूर्तिः ॥२॥
तदीयपट्टे नृपमाननीयो मल्ल्यादिभूषो मुनिवंदनीयः ।
ततो हि जातो वरधर्म्मधर्त्ता लक्ष्म्यादिचन्द्रो बहुशिष्यकर्ता ॥३॥

पंचाचाररतो नित्यं सूरिसद्गुणधारकः ।
लक्ष्मीचंद्रगुरुस्वामी भट्टारकशिरोमणिः ॥४॥

दुर्वारदुर्वादिकपर्वतानां वज्रायमानो वरवीरचन्द्रः ।
तदन्वये सूरिवरप्रधानो ज्ञानादिभूषो गणिगच्छराजः ॥५॥

त्रैविद्यविद्याधरचक्रवर्ती भट्टारको भूतलयातकीर्तिः ।
ज्ञानादिभूषो वरधर्म्ममूर्तिस्तदीयवाक्यात् कृतसारवृत्तिः ॥६॥

भट्टारको भुवि ख्यातो जीयाच्छ्रीज्ञानभूषणः ।
तस्य पट्टोदये भानुः **प्रभाचन्द्रो** वचोनिधिः ॥७॥

विशदगुणगरिष्ठो **ज्ञानभूषो** गणीन्द्र-
स्तदनुपदविधाता धर्म्मधर्ता सुभर्त्ता ।
कुवलयसुखकर्त्ता मोहमिथ्यांधहर्ता
स जयतु यतिनाथः **श्रीप्रभाचन्द्रचन्द्रः** ॥८॥

दीक्षा-शिक्षा-पदं दत्तं **लक्ष्मीवीरेन्द्र(न्दु ?)सूरिणा** ।
येन मे **ज्ञानभूषेण** तस्मै श्रीगुरुवेनमः ॥६॥
आगमेन विरुद्धं यद् व्याकरणेन दूषितं ।
शुद्धीकृतं च तत्सर्वं गुरुभिर्ज्ञानभूषणैः ॥१०॥

तथापि—

अत्र हीनादिकं किंचिद्रचितं मतिविभ्रमात् ।
शोधयन्तु महाभव्याः कृपां कृत्वा ममोपरि ॥११॥
हंसाख्यवर्णिनः येन ग्रन्थोऽयमुपदेशितः ।
तस्य प्रसादतो वृत्तिः कृत्वा **सुमतिकीर्तिना** ॥१२॥

श्रीमद्विक्रमभूपतेः परिमिते वर्षे शते षोडशे ।
विंशत्यग्रगते (१६२०) सिते शुभतरे भाद्रे दशम्यां तिथौ ।
ईलावे वृषभालये वृषकरे सुश्रावके धार्मिके
सूरिश्रीसुमतीशकीर्ति-विहिता टीका सदा नंदतु ॥१३॥

इति श्रीपंचसंग्रहाऽपरनामलघुगोम्मट्टसारसिद्धांतग्रन्थ - टीकायां कर्म्मकांडे सप्ततिनाम सप्तमोऽधिकारः ॥ इति श्रीलघुगोम्मट्टसारटीका समाप्ता ॥ [देहली पंचायती मन्दिर प्रति

१०५. रात्रिभोजनत्याग-कथा (ब्रह्म नेमिदत्त)

आदिभाग :—

श्रीमज्जिनं जगत्पूज्यं भारतीं भुवनोत्तमाम् ।
नत्वा गुरून्प्रवक्ष्येऽहं रात्रिभोजनवर्जनम् ॥१॥

अन्तभाग :—

जिनपतिमुखपद्मात् निर्गता दिव्यभाषा
मुनिपतिशतसेव्या सारतत्त्वप्रकाशा ।
कुमतितिमिरनाशा भानुभेव प्रशस्या
दिशतु मम सुखानि सर्वलोकैकभूषा ॥१॥
श्रीभट्टारकमल्लिभूषणगुरुः सूरिश्रुताब्धिः सुधी-
राचार्यो वरसिंहनन्दी सुगुरुः कुर्यात्सतां मंगलम् ॥२॥

इति भट्टारकश्रीमल्लिभूषण-शिष्याचार्यश्रीसिंहनन्दिगुरूपदेशेन ब्रह्म-नेमिदत्तविरचिता रात्रिभोजन-परित्यागफलदृष्टान्त-श्रीनागश्रीकथा समाप्ता।

१०६. नेमिनाथ-पुराण (ब्रह्म नेमिदत्त)

आदिभाग :—

श्रीमन्नेमिं जिनं नत्वा लोकालोकप्रकाशकम् ।
तत्पुराणमहं वक्ष्ये भव्यानां सौख्यदायकम् ॥१॥

अन्तभाग :—

गच्छे श्रीमति मूलसंघतिलके सारस्वतीये शुभे
विद्यानन्दगुरुप्रपट्टकमलोल्लासप्रदो भास्करः ।
ज्ञानध्यानरतः प्रसिद्धमहिमा चारित्रचूडामणिः
श्रीभट्टारकमल्लिभूषणगुरुः जीयात्सतां भूतले ॥१॥
प्रोद्यत्सम्यक्त्वरत्नो जिनकथितमहासप्तभंगी-तरंगैः
कान्तं मिथ्यामलनिकरः(?) क्रोधनक्रादिदूरः ।

श्रीमज्जैनेन्द्रवाक्यामृतविशदरसः श्रीजिनेंद्रप्रवृद्धिः
जीयान्मे सूरिवर्यो व्रतनिचयलसत्पुण्यपण्यश्रुताब्धिः ॥२॥

मिथ्यावादान्धकारक्षयकिरणरविः श्रीजिनेंद्रांघ्रिपद्म-
द्वंद्वे निर्द्वंद्वभक्तिर्जिनगदितमहाज्ञानविज्ञानसिन्धुः।
चारित्रोत्कृष्टभारो भवभयहरणो भव्यलोकैकबन्धु-
र्जीयादाचार्यवर्यो विशदगुणनिधिः सिंहनन्दी मुनीन्द्रः ॥३॥

यस्योपदेशवसिता(शतो) जिनपुंगवस्य नेमेः पुराणमतुलं शिवसौख्यकारी।
चक्रे मयापि तुच्छतमा(?)ऽत्र भक्त्या कुर्यादिमं श्रुततमं मम मंगलानि ॥४॥

(अगले एक पद्यमें नेमिपुराणात्मक आशीर्वाद है।)

इति श्रीत्रिभुवनैकचूडामणिश्रीनेमिजिनपुराणे भट्टारकश्रीमल्लिभूषण-शिष्याचार्यसिंहनंदिनामाङ्किते ब्रह्मनेमिदत्तविरचिते श्रीनेमितीर्थंकर-परमदेव-पंचकल्याणकव्यावर्णनो नाम षोडशोऽधिकारः ॥

१०७. समवसरणपाठ (पं० रूपचन्द)

आदिभाग :—

नमस्कृत्यार्हतः सिद्धान् सूरीन् सत्पाठकान्मुनीन्।
विदधे केवलज्ञानकल्याणार्चां शुभाप्तये ॥१॥

अन्तभाग :—

नाभेयभुक्तिरुचिरे कुरुनाभिदेशे शुद्धे सलेमपुरवाकूपहिरूपसिद्धे।
अग्रोतकान्वयविभूषणगर्गगोत्रः श्रीमामटस्य तनयो भगवानदासः ॥१॥
तत्पूर्वपत्न्यां प्रभवः प्रतापी श्रीब्रह्मदासेति समासवृत्तः।
द्वितीयचाचो इति संज्ञिकायां पत्न्यां भवाः पंचसुताः प्रसिद्धाः ॥२॥
हरिरिव हरिराजो भूपतिर्भूमिर्वोच्च(?)भवदभयराजः कीर्तिचन्द्रः सुकीर्त्तिः।
तदनुजकविरूपो रूपचन्द्रो वितंद्रो विमलसुमतिचक्षुर्जैनसिद्धांतदक्षः ॥३॥

स रूपचन्द्रोऽथ समाव्रजत्पुरीं वानारसीं बोधविधानलब्धये ।
आस्वाद्य शब्दार्थसुधारसं ततः संप्राप्तवांस्तद्दरियापुरं परं ॥४॥
विराजिते यत्र महोदये कुलं न राजते किं न महोदयाकुलं ।
न यत्र केन क्रियतेऽप्यसत्क्रिया न(ना ?)क्रियते केन य एव सत्क्रियाः ॥५॥

× × × ×

श्रीमत्साहिजलालदीनविलसद्वंशाद्रिभास्वान्महा-
नुद्यद्विश्वमहोमहोदयजहांगीरात्मजः सज्जयः ।
स श्रीसाहिजहांनरेन्द्रमहितो मद्यां(ह्यां)चकत्तान्वयः
श्रीन्द्रप्रस्थपुरप्रतापविदितो यत्पालने प्रोद्गतः ॥१०॥

श्रीमन्मूलमहोदयैकतिलकश्रीनंदिसंघप्रभुः
प्रायः प्रोल्लसदुत्तरस्यांग(?) बलात्कारे गणे गौरवः ।
गच्छे स्वच्छसरस्वतीप्रविदिते श्रीकुन्दकुन्दान्वये
वादीभेदमदप्रभेदनविधौ श्रीसिंहकीर्तिर्महान् ॥११॥

तत्पट्टाद्रिविभास्करो धृतिधरः श्रीधर्मकीर्तिः कृती
तस्मात्शीलविभूषणो गुणनिधिर्गण्यो गणीन्द्रोऽजनि ।
सिद्धांताम्बुधिपारसारसुहितः प्रायः प्रतापस्ततः
प्रोद्यत्पुण्यपरः प्रसिद्धमुनिराट् श्रीज्ञानभूषोऽभवत् ॥१२॥

तत्पट्टे प्रमदप्रकाशविलसत् श्रीभारतीभूषणः
चारित्राचरणाच्चमत्कृतदशः किं वा तपोभूषणः ।
श्रीभट्टारकवंदितांह्रियुगलो गण्योऽप्यनुद्दूषणः
शश्वत् किन्ननमस्यते बुधगणैः श्रीमज्जगद्भूषणः ॥१३॥

श्रीमद्गोलापूर्वान्वयगिरिशिरसि प्रोद्गतो विश्वविद्या-
लीलाविध्वस्तमिथ्यात्वविभवतिमिरस्तोमलब्धप्रतापः ।
भास्वानाधोगोत्रप्रविदितविभवः श्रीजगद्भूषणाना-
माम्नाये सन्निधानोऽभवदखिलगुणो दिव्यनेत्राविधानः ॥१४॥

तत्पत्नीकृतवर्गपोषविधितः स्वर्गैकसंपत्करः
धर्माश्लिष्टविशिष्टमाणसुगुणादुर्गाख्यया सगंतः ।
आसीत् शक्रसमः सुपूर्वतनयः श्रीचक्रसेनस्तयोः
प्रोद्यच्चित्रविचित्रतागुणमयः श्रीमित्रसेनोऽपरः ॥१५॥
यद्विद्याप्रभवत्प्रतापभयभाग् विद्वद्घटाभूयमा ।
व्याजप्राप्तवनांतगापि भयतां श्रीचक्रपाणिश्रुते ॥१६॥
वक्त्रे विस्तरता किमत्र तदिह प्रायष्युनर्वण्यते(?) ।
प्राशैस्तद्गुणगौरवस्य जयतु श्रीचक्रसेनो महान ॥१७॥
तस्य प्रिया शीलनिधिशलीलं(?) कृष्णावती तत्प्रभवोऽर्तिविघ्नः ।
यो गाजितो भोगसमीप्सितात्मा सुयोगभावोपि विभाति भूत्या ॥१८॥
इजा इवाख्यात्र तदंगनास्तयोर्बभूवतुः केवल-धर्मसेनकौ ।
सुतौ सुशीलौ विलसन प्रभापरौ जगत्त्रये पुष्पवतां सुसंपदः ॥१९॥
श्रीमद्दिव्यदृशो द्वितीयतनयः पूर्णप्रतापप्रभा-
भामच्चारुललाटदर्पितजनस्तौमैकचेतोऽम्बुजः ।
स श्रीचित्रपवित्रतात्मविभवः श्रीमित्रसेनो महान्
सद्दानैकनिधानतां प्रविदधत संप्रामसानो बभौ ॥२०॥
सुशीलया तत प्रियया प्रभूतौ यशोदया गीतगुणो यशोभिः ।
संघाधिपः श्रीभगवानदासो विराजतेऽसौ परमप्रतापी ॥२१॥
तद्भामिनी केशरिदे शुभानना तयोः प्रजातास्तु सुता अमी त्रयः ।
महादिसेनो जिनदाससंज्ञिकस्ततो मुनिःसुव्रतवाक् सुखप्रदाः ॥२२॥
श्रीमित्रसेन-तनयो हरिवंशो द्वितीयकः ।
विशिष्टगुणसंपन्नो विभाति वृषवत्सलः ॥२३॥
श्रीमान् श्रीभगवानदास इति वाक्पूर्णप्रतापो महान्
भक्त्या श्रीजिनराजपादयुगलप्रायः प्रतिष्ठापनं ।
कृत्वा यो भुवि संघराजपदवीं चिकाय(?)सद्विक्रमी
भूयो दानविधानमानकरणैर्जी········ श्चिरं ॥२४॥

श्रीमान्किं भरतेश्वरः किमथवा श्रेयान्नृपः श्रेयसा
शक्रः किं किमु देवसूरिरनघः किं राजराजो महान् ।
यस्यालोकविधौ प्रसिद्धविबुधाः संदिग्धभाजोऽभवन्
सोऽयं श्रीभगवानसंघपतिराट् प्रायश्चिरं जिव्य(जीय)ताम् ॥१५॥

× × × ×

तेन श्रीवरसंघराजभगवद्दासेन संपोषिता
वाग्देवी बुधरूपचंद्रमभितः संप्रेयमाणाऽभवत् ।
श्रीसर्वज्ञपदांबुजार्चनकृतौ कैवल्यकेलीमयं
चक्रे चारुपदावलीललितमाचार्यसर्ज्या(?)विधिं ॥३२॥

ज्ञात्वा श्रीमुनिपाणिनीयमतुलालंकारपारं दधत्
षट्तर्काविधितां(?) प्रपद्य श्रु(?)वृहत्तारादिकानागमान् ।
सिद्धान्तान् परिचिंत्य वाग्भटकृतामा(ना)शाधरीश्र(म)द्भुतां
बुध्वा वृत्तिमचीकरं किमपरं कैवल्यसंपूजनम् ॥३३॥

श्रीमत्संवत्सरेऽस्मिन्नरपतिनुतयद्विक्रमादित्यराज्ये-
ऽतीते दृगनंदभद्रांस(शु)कृत्परिमिते(१६६२ ?) कृष्णपक्षे ष(?)मासे ।
देवाचार्यप्रचारे शुभनवमतिथौ सिद्धयोगे प्रसिद्धे
पौनर्वस्वित्पुडस्थे(?) समवसृतिमहं प्राप्तमाप्तासमाप्तिं ॥३४॥

अनेकतर्कसंकर्ष-प्रहर्षित-बुधोत्तमः
स्वधर्मेनाव यशस्फूर्त्तिर्जीयात् श्रीप्रीतिवर्द्धनः ॥३५॥

जीयात् श्रीरूपचन्द्रश्चिरमिह महितः शब्दशास्त्रार्थधारैः
वीरः प्रशान्ततां यो बुधगणवनिता-गीयमानो यशोभिः ।
सद्वादे सर्वविद्यावरद इतिपदं विश्वलोके प्रसिद्धं
विद्वद्वाधिदेवः प्रवरजिनमते स्रग्धराभ्यर्च्यमानः ॥३६॥

जीयात् श्रीनेत्रसिंहोऽयं शाश्वत्शिष्याग्रणीर्महान् ।
नित्यं नेत्रमिवाभाति विद्वज्जनवचो(मनो)हरः ॥३७॥

शब्दार्थरीतिरूपाढ्या गुणालंकारधारिणी ।
जिनार्चा भामिनी भूयात् प्रसिद्धेयं महीतले ॥३८॥
श्रीमता रूपचन्द्रेण कृतेयं श्रीजिनार्हणा ।
कारिता भगवद्दास-संघराजेन भक्तितः ॥३६॥
आचार्यकश्रीजिनेशेन(जिनसेन)भाषितमहापुराणोक्तविधैरनुक्रमात ॥
कृतेयमर्चा जिनकेवलोदया भव्यात्मानां संविदधातु मंगल ॥४०॥

× × × ×

जिन-सिद्ध-महाचार्योपाध्यायसाधवः सदा ।
कुर्व्वन्तु संस्तुताः श्रीमद्रूपचन्द्राय मंगलं ॥४८॥

इति श्रीमत्पंडितरूपचन्द्र-कृतं श्रीसंघाधिपति-भगवानदास-कारितं भगवत्समवसरणार्चनविधानं समाप्तं ॥

१०८. सुखनिधान (कवि जगन्नाथ)

आदिभाग :—

नाभेयं करुणासिंधुं भव्यपंकज-भास्करं ।
शाश्वतं सौख्यसदनं नमामि भवशान्तये ॥१॥

× × × ×

श्रीश्रीपालचरित्रस्य रचने महती मम ।
वांछा प्रजायतेऽत्यंतं विदेहस्थस्य चक्रिणः ॥४७॥
मंदबुद्धिः कलामूढो विद्याभ्यामपरिच्युतः ।
यदहं शास्त्रकर्तेति गमिष्यामि हसं बुधां(धान् ?) ॥४८॥
तथा च—कवयः सिद्धसेनाद्या [वयं तु] कवयो मताः ।
मणयः पद्मरागाद्या ननु काचोपि मेचकः ॥४६॥
परं किमत्र पांडित्यं सरलैर्निनदैस्त्विं(रहं?) ।
चरित्रं रचयाम्येष नाम्ना सुखनिधानकं ॥५०॥

अन्तभाग :—

धीरा विशुद्धमतयो मम सच्चरित्रं कुर्वन्तु शुद्धमिह यत्र विपर्ययोक्तं।
दीपो भवेत्किल करे न तु यस्य पुंसो दोषो न चास्ति पतने खलु तस्य लोके॥
आचार्यपूर्णेन्दु-समस्तकीर्ति-सरोजकीर्त्यादिनिदेशतो मे।
कृतं चरित्रं सुपुरांतमाले श्रीपालराज्ञः शंधामनाम्ना ॥२०६॥
दिवाकरो निशाकरो नदीश्वरोथ भूतलं नभोपि भानि भांति वै घनाथ तारकाः(?)
उमापती रमापतिः शचीपतिर्जगत्पतिर्भवेत्स यावदेष कोपि तावदेव राजतां॥२१०
खखर्षिभूमीन्दुयुते(१७००)सुवत्से शुच्यां दशम्यां च शुभाऽश्विनस्य।
पुरांतमाले सुपुरे महेन ग्रन्थं जगन्नाथसुधीरकार्षीत् ॥२११॥
मंगलश्रीमहाभामत् महाराजमहानग
मतिमन्नाम भो नाथ म(य)तीनां धीमतां वरः ॥२१२॥
नामगर्भित-कमलबन्धमिदं।

इति त्रिमलसकलागमावलीमंडित-खंडितानेककुवादि-परिरंजिताखिल-लोक-सच्चातुरीकातरीकृतमिथ्यात्वनिवहस्य राजेन्द्रकीर्त्ति* मुख्यांतेवासिना गद्यपद्यविद्याविनोदाम्बुधिना कविचक्रवर्तिना जगन्नाथनाम्ना कृते सुखनिधा-ननाम्नि ग्रंथे विदेहक्षेत्रस्थश्रीपाल-मुक्तिगमननामः पंचमः परिच्छे

१०६. पद्मचरित-टिप्पण (श्रीचन्द्रमुनि

आदिभाग :—

शंकरं वरदातारं जिनं नत्वा स्तुतं
कुर्वे पद्मचरितस्य टिप्पितं(प्पण

अन्तभाग :—

'लाडवागडि - श्रीप्रवचनसेन·

---

* पूर्वकी सब संधियोंमें 'नरे
उसीका पर्यायनाम जान पड़ता है।

बलात्कारगणश्रीश्रीनंद्याचार्यसत्कशिष्येण श्रीचंद्रमुनिना श्रीमद्विक्रमादित्यसंवत्सरे सप्ताशीत्यधिकवर्षसहस्रे(१०८७) श्रीमद्धारायां श्रीमतो भोजदेवस्य राज्ये पद्मचरित [टिप्पणं कृतं]। एवमिदं पद्मचरितटिप्पितं श्रीचन्द्रमुनिकृतं समाप्तमिति ।

११०. श्रीदेवताकल्प (भ० अरिष्टनेमि)

आदिभाग :—

प्रणम्य जिनमुत्तुंग-स्याद्वादनयभासुरं ।
क्रियते श्रीदेवताकल्पं कल्पामरसुसेवितं ॥१॥
नानावृत्त-पदन्यास-वर्णालंकाहारिणी ।
सन्मार्गगामिता जैनी प्रसन्ना नः सरस्वती ॥२॥
विद्यानुवादनिलयं श्रुतसारविद्भिर्भव्योपकार इति चिंत्य महर्षिभिस्तं ।
स्पष्टीकृतं पुनरहं विदधेऽल्पबंधं नात्यन्तविस्तरकृतं न विदंत्यशेषं ॥३॥
मंत्री मंत्रविधिर्होमो देवताराधनक्रिया ।
यंत्र-मंत्र-प्रयोगाश्च दृश्यन्तेऽत्र विशेषतः ॥४॥

अन्तभाग :—

श्रीयुवतिसदनपद्मं राजेन्द्राशिरस्सुशेखरीकृतपद्म ।
भव्यानिहितपद्मं (?) श्रीवीरसेनपदयुगपद्मं ॥२०६॥
शिष्यः श्रीवीरसेनस्य विद्वद्दिनथनायकः ।
गुणसेनो महाख्यातो मदवादीभकेशरी ॥२१०॥
तस्य शिष्यो भवेत्ख्यातो विद्वदंभोजभास्करः ।
विशिष्टोऽरिष्टनेमीशो दुष्टवादिमदापहः ॥२११॥
रचितं नेमिनाथेन त्रैविद्येन यतीशिना।
स्थेयाच्छ्रीदेवताकल्पं यावच्चन्द्र-दिवाकरौ ॥२१२॥
इत्यरिष्टनेमि-भट्टारकविरचिते श्रीदेवताकल्पे तंत्राधिकारः समाप्तः ।

[जौहरी मनोहरलाल देहली प्रति

१११. क्षपणासार (माधवचन्द्र त्रैविद्यदेव)

आदिभाग :—

> श्रीसद्धर्मसमुद्रनंदनवरः संवृद्धरत्नाकरः
> सत्सेव्यो विमलोऽतुलः सुखकरो लोकप्रकाशप्रदः ।
> उद्यद्बीबलभद्रमाधवनुतश्रीपादपद्मद्वयो
> यो यूयं नमतादराकृतधियस्तं नेमिचन्द्रं सदा ॥१॥

क्षपणासारशास्त्रस्य नांदीसूत्रव्याख्यानमिदं—

श्रीसद्धर्म्मसमुद्रनंदनवरः सप्तांगराज्यलक्ष्म्या विशिष्टक्षात्रधर्मेण च युतः समुद्रविजयप्रियपुत्रः, **संवृद्धरत्नाकरः** × × × × × एवं विधं हरिकुलतिलकभूतनेमिनाथस्वामिनं शास्त्रकारः स्वयं निर्भरभक्त्या नमन् यूयमपि नमस्कृत्य कृतार्था भवतेति भव्यजनान् प्रेरितवानित्यर्थः । शास्त्रकारस्य गुरु नेमिचन्द्रसिद्धांतचक्रवर्तिवंदनारूपेणाथवा मंगलसूत्रं व्याख्यानं कर्तव्यं । तद्यथा—यः **श्रीसद्धर्मसमुद्रनंदनवरः** स्याद्वादलक्षणलक्ष्मी-जन्मावासभूतः विशिष्टसागाराऽनागार-धर्म्म-समुद्र-वर्द्धनमुख्यः, **संवृद्धरत्नाकरः** पंचविंशतिमलरहितविशिष्टसम्यक्तनिरतिचारचारुचारित्रसकलशास्त्रार्थ-परिच्छेदनपटियदुष्ट(?)विमलज्ञानरूप-रत्नानामुदयस्याकरभूतः, **सत्सेव्यः** विद्वज्जनपूज्यः, **विमलः** अनवरतपरमागमभावनासुधासागरावगाहप्रक्षालितात्मीय-कलिकलुषमलपकसंदोहः, **अतुलः** कवि-गमकि-वादि-वाग्मिता-गुणैरद्वितीयः, **सुखकरः** मिथ्यात्वाद्यपाय-निराकरणेन सम्यक्त्वाद्युपाय-प्रदर्शनेन समस्तजनस्य हितकरः, **लोकप्रकाशप्रदः** श्रुतज्ञानप्रबल-प्रभाकर-प्रभूत-प्रभा-प्रभावेन जनस्य सर्वपदार्थानां करतलामलकवद्दर्शकः, **उद्यद्बीबलभद्रमाधवेनः** सूद्दवंडात्मकसिद्धांतार्थ-धारण-प्रतिपादन-समर्थ-मतिबलविशिष्टगुणैरुत्कृष्टमाधवचन्द्रमुनिना पंचांगमंत्रवृहस्पतिसमानबुद्धि-युत भोजराजप्राज्यसाम्राज्यसमुद्धरणसमर्थ-बाहुबलयुक्त-दानादिगुणोत्कृष्ट-महामात्य-पदवी-लक्ष्मी-वल्लभ-बाहुबलिमहाप्रधानेन वा, नुत श्रीपाद-

पद्मद्रुव: वंदितश्रीपादपद्मयुगलः तं नेमिचंद्रं एवं विधं नेमिचन्द्राचार्यं कृतधियः एतच्छास्त्रश्रवणे दत्तचित्ताः श्रोतृजनाः यूयमादरात् निर्भरभक्त्या सदा सर्वकालं नमत वंदनां कुरुत। चंद्रेण सह श्लेषो तत्पक्षेऽपि अयं सूत्रार्थः संबंधनीयः × × × × ×।

अन्तभाग :—

यः कृष्टिं स्पर्द्धकानां व्यतनुत विधिवल्लक्षणां तद्विकल्पं
साकल्येन प्रमाणं नशनविधिमतो मोक्षसंप्राप्त्युपायं।
भक्त्या भव्या भजध्वं कृतियतिवृषभं तं सदालोकदृष्टिं
षट्खंडं श्रीधवाद्यद्विजविभुवलबद्धाहुबल्यर्च्यपादं ॥१०॥

ये कृत्वा धवलां जयादिधवलां सिद्धांतटीकां सतीं
चंद्रार्कद्युतवत्समस्तभुवनं प्राकाशयन् संततं।
उत्कृष्टं च महापुराणमनिशं तान्संघनिस्तारकान्
वंदध्वं वर वीरसेन-जिनसेनाचार्यवर्यान् बुधाः ॥११॥

कीर्तिश्छत्रयुतस्तपोबलवृतश्चारित्रसिंहासनः
शीलास्त्रः शमचामरः पृथुदयादुर्गः सुदृक्कोशवान्।
प्रज्ञाचक्रधरः सुयोगसचिवः सिद्धांतषट्खंडकं
यो रक्षन् मुनिचन्द्रसूरि-सुपतिं तं नौमि मूर्ध्नादरात् ॥१२॥

दुःखौर्वे वननादिवीचिनिचयं मिथ्यात्वनक्राकुलं
मोहांबुनरकादिगर्तममितं घोरं भवांभोनिधिं।
यः सत्पालयतत्त्वदेशनमहा नावाहमुत्तीर्णवान्
सैद्धांताधिपनेमिचन्द्रगणिनं तं नंनमीमि त्रिधा ॥१३॥

विनेयसुखकारकं सकलसंघनिस्तारकं
स्मरेभमददारकं नियमसंयमाराधकं।
त्रिगौरवनिवारकं श्रुतसमुद्रसंपूरकं
नमामि गणधारकं सकलचन्द्रभट्टारकं ॥१४॥

तपोनिधिमहायशः सकलचन्द्रभट्टारकः
प्रसाधिततपोबलादिविपुलबोधसच्चक्रतः ;
श्रुतांबुनिधिनेमिचन्द्रमुनिपप्रसादा-
गतात्प्रसाधितमविघ्नतः सपादि येन षटखंडकं ॥१५॥
अमुना माधवचन्द्रदिव्यगणिना त्रैविद्यचक्रेशिना
क्षपणासारमकारि बाहुबलिसन्मंत्रीशसंज्ञप्तये ।
शककाले शरसूर्यचंद्रगणिते(११२५) जाते पुरे दुल्लके
शुभदे दुंदुभिवत्सरे विजयतामाचंद्रतारं भुवि ॥१६॥

इति क्षपणासारः समाप्तः । संवत् १८१६ मिति वैशाखवदि ११ दिने ।
[जयपुर तेरहपंथी मन्दिर प्रति

११२. षड्दर्शनप्रमाणप्रमेयसंग्रह (शुभचन्द्र)

आदिभाग :—

साद्यनंतं समाख्यातं व्यक्तानंतचतुष्टयं ।
त्रैलोक्ये यस्य साम्राज्यं तस्मै तीर्थकृते नमः ॥

सकलतीर्थकृदाभिमतप्रमाणप्रमेयानुप्रवेशार्थमिदं । तत्र तावदर्हतोऽप्रतिहतशासनस्य—तत्त्वज्ञानं प्रमाणं । तद्द्विविधं प्रत्यक्षं परोक्षं च । स्पष्टमाद्यमस्पष्टमन्यत् । त्रिधा च सकलेतरप्रत्यक्ष-परोक्षभेदात् । करण-क्रमव्यवधानापोढं सकलप्रत्यक्षं । क्रमान्वितं करणव्यवधानापोढं विकल-प्रत्यक्षं । इंद्रियमनोव्यापाराभिमुखेतरार्थापेक्षं परोक्षं । अथवा मतिश्रुता-वधिमनःपर्ययकेवलभेदात्पंचतयं ॥

अन्तभाग :—

इति नैय्यायिकमतानुप्रवेशः ॥

मतसमासः । अमीभिः पुनर्वत्स विवेकमहापर्वताग्रदेरप्रमत्तशिखर-स्थितैर्जिनपुरनिवासिभिः जैनलोकैरयं दृष्टो निर्वृतिनगरीगमनमार्गः । यदुत—

जीवाजीवास्रवबंधसंवरनिर्जरामोक्षास्तत्त्वं । तत्र सुखदुःखज्ञानादिपरिणामलक्षणो जीवः । तद्विपरीतस्त्वजीवः । मिथ्यादर्शनाविरतिप्रमादकषाययोगा बंधहेतवः । कायवाङ्मनः कर्म योगः । स आस्रवः । आस्रवकार्यं बन्धः । आस्रवनिरोधः संवरः । संवरफलं निर्जरा । निर्जराफलं मोक्षः । इत्येते सप्तपदार्थाः । तथा विधिप्रतिषेधानुष्ठानपदार्थाविरोधश्चात्र जैनेन्द्रदर्शने । स्वर्ग-केवलार्थिना तपोध्यानादि कर्तव्यं । सर्वजीवा न हंतव्याः । इति वचनात् । 'समितिगुप्तिश्रद्धाक्रियासपत्नो(?)योग' इति वचनात् । उत्पादविगमद्र(ध्रौ)व्ययुक्तं सत् । एकं द्रव्यमनंतपर्यायमर्थं इति । प्रत्यक्षपरोक्षे द्वे एव प्रमाणे । इति जैनमतस्य निदर्शनमात्रं ।।

जयति शुभचन्द्रदेवः कंडूर्गणपुंडरीकवर(न)मार्तंडः ।
चंडत्रिदंडदूरो राद्धान्तपयोधिपारगो बुधविनुतः ।।

११३. तत्वार्थवृत्तिपद (प्रभाचन्द्राचार्य)

आदिभाग :—

सिद्धं जिनेन्द्रमलमप्रतिमबोधं त्रैलोक्यवंद्यमभिवंद्य गतप्रबंधं ।
दुर्वारदुर्जयतमः प्रविभेदनार्कं तत्त्वार्थवृत्तिपदमप्रकटं प्रवक्ष्ये ।।

कश्चिद्भव्यः प्रसिध्येक(?)नामा प्रत्यासन्ननिष्ठः निष्ठाशब्देन निर्वाणं चारित्रं चोच्यते प्रत्यासन्ना निष्ठा यस्यासौ प्रत्यासन्ननिष्ठः । अवाग्विसर्ग...... ।

अन्तभाग :—

इति दशमोध्यायः समाप्तः

ज्ञानस्वच्छजलस्सुरत्ननितरा(चय)श्चारित्रवीचीचयः
सिद्धान्तादिसमस्तशास्त्रजलधिः श्रीपद्मनन्दिप्रभुः ।
तच्छिष्यान्निखिलप्रबोधजननं तत्वार्थवृत्तेः पदं
सुव्यक्तं परमागमार्थविषयं जातं प्रभाचन्द्रतः ।।
श्रीपद्मनन्दिसैद्धान्तशिष्योऽनेकगुणालयः ।
प्रभाचन्द्रश्चिरं जीयात् पादपूज्यपदे रतः ।।

मुनीन्दुनंदतादिंदभिजमानंदमंदिरं ।
सुधाधारोद्गिरन्मूर्तिः काममामोदयज्जनं ॥
इतितत्त्वार्थवृत्तिपदं समाप्तम् ।

११४. करकण्डु-चरित्र (भ० शुभचन्द्र)

आदिभाग :—

श्रीमते श्रुनिसिद्धाय प्रबुद्धाय परात्मने ।
नमो वृषभनाथाय नग्नाथनतांह्नये ॥१॥

अन्तभाग :—

(**'श्रीमूलसंघेऽजनि पद्मनन्दी'** इत्यादि पद्य नं० ३४ से लेकर ४७ तक १४ पद्य प्रायः वे ही हैं जो पाण्डवपुराणकी प्रशस्तिमें पृष्ठ ४६-५० पर नं० १६७ से १८० तक मुद्रित हो चुके हैं ।)

करकंडुनरेन्द्रस्य चरितं तेन निर्म्मितं ।
जिनेशपूजनप्रीत्येदं समुद्धृत्य शास्त्रतः ॥४८॥
शिष्यस्तस्य समृद्धिबुद्धिविशदो यस्तर्क्कवेदी वरो
वैराग्यादिविशुद्धिवृद्धिजनकः सर्व्वार्थसुज्ञो महान् ।
संप्रीत्या सकलादिभूषणमुनिः संशोध्य चेदं शुभं
तेनालेखि सुपुस्तकं नरपतेराद्यं सुचंपेशिनः ॥४६॥
सकलभूषणआद्यसुभूषणो मुनिरभूदिह शास्त्रसुसंग्रहे ।
अकृतयोधिकृतः सुसहायतां पठन-पाठन-लेखन-सद्विधौ ॥५०॥

× × × ×

श्रीमूलसंघे कृत(ति)नंदिसंघे गच्छे(गणे?)बलात्कार इदं चरित्रं ।
पूजाफलेद्धं करकंडुराज्ञो भट्टारकश्रीशुभचन्द्रसूरिः ॥५४॥
द्वाष्टे विक्रमतः शते समइते चैकादशाब्दाधिके (१६११)
भाद्रे मासि समुज्वले युगतिथौ खड्गजवाछे पुरे ।

श्रीमच्छ्रीवृषभेश्वरस्य सदने चक्रे चरित्रं त्विदं
राज्ञः श्रीशुभचन्द्रसूरियतिपश्चंपाधिपस्याद्भुतं ॥५५॥
श्रीमत्सकलभूषेण पुराणे पांडवे कृतं ।
साहाय्यं येन तेनाऽत्र तदकारि सुसिद्धये ॥५६॥

इति भट्टारक-श्रीशुभचन्द्रविरचिते मुनिश्रीसकलभूषणसाहाय्यसापेक्षे भव्यजन-जे(सं)गीयमान-यशोराशिश्रीकरकंडुमहाराजचरिते करकंडुदीक्षा-ग्रहण-सर्व्वार्थसिद्धिगमनवर्णनो नाम पंचदशः सर्गः ॥१५॥

[देहली सेठ कूँचा मन्दिर प्रति

११५. शांतिकविधि (पं० धर्मदेव)

आदिभाग :—

प्रणिपत्य जिनान् सिद्धानाचार्यान्पाठकान् यतीन् ।
सर्वशांत्यर्थमाम्नायपूर्वकं शांतिकं ब्रुवे ॥ १ ॥

अन्तभाग :

पोरपाटान्वये श्रीमान् वाग्भटः श्रावकोत्तमः ।
तत्पुत्रो वरदेवोऽभूत्प्रतिष्ठाचारकोविदः ॥१॥
श्रीदत्ताख्यस्तदनुजः सर्व्वशास्त्रविशारदः ।
तत्पत्नी मानिनी ख्याता पातिव्रत्यविराजिता ॥२॥
तयोस्तु धर्म्मदेवाख्यः पुत्रोऽभवदनूद्भवः ।(...?)
श्रीगोगाख्यस्य विप्रस्य(?) दूरीकृतकलागुणः ।(...?) ॥३॥
तेनाकारि शुभायेदं शांतिकस्नानमुत्तमं ।
पठन्तु श्रावकाः सर्व्वे शोधनीयं महात्मभिः ॥४॥
यावन्मेरुर्मही यावद्यावच्चन्द्रार्कतारकाः ।
तावद्भद्राणि पश्यन्तु शांतिकस्नानपाटकाः ॥५॥

इति श्रीपंडितधर्म्मदेवविरचितं श्रीशांतिकपूजाविधानं समाप्तम् ।

[जौहरी मनोहरलाल देहली प्रति

११६. अम्बिका-कल्प (भ० शुभचन्द्र)

आदिभाग :—

वन्देऽहं वीरसन्नाथं शुभचन्द्रो जगत्पतिं ।
येनाप्येत महामुक्ति-वधूस्त्री-हस्तपालनम् ॥१॥
ज्ञानभूषं तपोभूषं धर्मभूषं सुभूषणम् ।
प्रणम्य वक्ष्येऽहं कल्पं तीव्रज्ञानप्रवर्द्धकम् ॥२॥
ऊर्जयंत-निवासिन्याः यक्षिमुख्यायाश्चाम्बिकाया:(?) ।
तत्पादौ प्रणम्य च त्रिजगतीक्षेमकरौ(?) ॥३॥ युग्मं
जीवकोद्भव-सचन्द्र-पांडवोद्भव-दत्तक-
प्रमुखानां चरित्राण्यवदत् सोऽहं वदाम्यहम्(?) ॥४॥
कुन्दपट्टे यथाग्रंथं जिनसेनोऽपि नामतः ।
सोर्थो ह्यरीरचन्मंगलं श्रीमंत्रप्रसंगहं(?) ॥५॥
गुणभद्रस्तदन्तेयः सोपि सार्थो हि टिप्पणं ।
ग्रंथं चक्रे महाकोचसुकोचफलपूरितं ॥६॥
तदन्वये मन्दबुद्धिर्जातोऽहं श्रीडपूरितः ।
तथाप्याम्नायं मुमोच न हि जैनपरम्परां ॥७॥
अर्हत्सिद्धाचार्योपाध्यायसुसर्वसाधूनां ।
प्रथमाक्षरेण मिलितः प्रणवः सिद्धिमागमत् ॥८॥

अन्तभाग :—

शुभचन्द्रो मुनिरहं जिनदत्तस्य चाग्रहात् ।
ब्रह्मशीलस्य तस्यैवं पठनार्थं दिने कृतं ॥१२॥
गुरुणा मन्त्रदेशो(?) न कथितो मारदूषणात् ।
तथापि नाहं चक्रेशौ(?) वादात् श्रीधर्मणः कृतात् ॥१३॥
सौबोद्धस्त्वं ज्ञातासि त्वन्मते शक्तिरर्हतः ।
पाखंडिमतविख्यातस्तवेति कथितस्तदा ॥१४॥

जिनदत्तस्य ज्ञानार्थं दिने चैके कृतं मया।
ज्ञानिना वाचितासौ च मा भूः सिद्धोस्यदूषणं(?) ॥१५॥
× × × ×

इत्यंबिकाकल्पे चार्षे शुभचन्द्रप्रणीते सप्तमोऽधिकारः समाप्तः ॥७॥
नाम्नाधिकारः प्रथितोयं यंत्रसाधनकर्मणः।
समाप्त एषमंत्रोऽयं पूर्णो कुर्यात् शुभंवनः(?) ॥१॥
इत्यम्बिकाकल्पः। [जौहरी मनोहरलाल देहली प्रति

११७. तत्त्वार्थ-टिप्पण (भ० प्रभाचन्द्र)

आदिभाग :—

सो णवमि वीरणाहं वीरो वरवीरमाइसंजुत्तो।
णामाइ पंच सहिओ कम्मचुओ मोक्खसंपत्तो ॥१॥
इहैव भारते क्षेत्रे आर्यवे(?)सुरसत्प्रिये।
हिरण्याक्षे (हरनाख्ये) जनपदे जिनतीर्थसमन्विते ॥२॥
सुनामाख्यं पुरं तत्र विबुधैर्म्मण्डितं वरं।
जिनवेश्मनि संसीनो नयसेनार्य-संततौ ॥३॥
लतांतसरयूथेन्द्र(?) हरिः क्रोधानलाष्टकः।
श्रीमद्भट्टारको हेमकीर्तिस्तत् शिष्यकः सुधीः ॥४॥
धर्मचन्द्रो यतिपतिः जैना(काष्ठा)म्नायाभ्रभास्करः।
तत्पट्टे श्रीप्रभाचंद्रः सर्वसंघसमन्वितः ॥५॥
धर्म्माख्यानं च कुर्वन् सन् यावदास्ते दिगंबरः।
तावदुवाच काल्हूतुक(सुत ?) हावासाधुः प्रणम्य च ॥६॥
अध्यात्मरससंसिक्तं मानसं यस्य निर्मलं।
भो मुने सद्गुणावास तत्त्वार्थं कथय प्रभो ॥७॥
एतद्वचः समाकर्ण्य प्रोवाचेति कथं मया।
धीर्विना कथ्यतत्त्वार्थं बहुभेदेन संयुतं ॥८॥

तथापि कथ्यते साधो शृणुदत्तावधानतः ।
बुद्धया विनापि पूर्वार्यैः भाषितं यज्जिनागमे ॥९॥
धर्माख्यनं स कुरुते तावत्कतिपयैर्दिनैः ।
चलचित्तो मुनिर्यातो देशान्तरगमोद्यतः ॥१०॥
प्राप्तः पुरे सकीटाख्ये समानीतो जिनालये ।
लंबकंचुकआम्नाये सकरू(तू) साधुनंदनः ॥११॥
पंडितो सोनिको विद्वान् जिनपादाब्जषट्पदः ।
सम्यग्दृष्टी गुणावासो बुध-शीर्षशिरोमणिः ॥१२॥
प्रणम्य वचनं प्रोक्तं भो यते कामकेसरे ।
सरलं सप्ततत्त्वार्थं ममाग्रे कथय प्रभो ॥१३॥
तद्वचनाद्यतिपतिः प्रोवाच शृणु पंडित ।
कथयामि तवाग्रेऽहं तत्वार्थं यज्जिनोदितं ॥१४॥
पंचगुरुनमस्कारं कृत्वा तत्त्वार्थसूत्रसुगमार्थं ।
टि(सट्टि ?)प्पणं करोमि भव्यजन-प्रवोधनार्थाय ॥१५॥

(आगे 'मोक्षमार्गस्य नेतारं' इत्यादि मंगलपद्यसे टिप्पणका आरंभ है ।)

अन्तभाग :—

द्वीपेऽथ जंबूपपदे जंबूवृक्षलक्षिते ।
भारतं तत्र विख्यातं क्षेत्रं षट्खंड[रा]जितं ॥४॥
तत्रार्यखंडविदितो जिनतीर्थैरलंकृतः ।
पंचालस्तत्र विषयो जनसौख्यप्रदायकः ॥५॥
श्रीमत्काष्ठान्वये ख्यातः कामकुञ्जरकेशरी ।
भट्टारकः सुरेन्द्राख्यो हेमकीर्तिर्मुनीश्वरः ॥६॥
तत्पट्टे निर्मदः शान्तः मायावल्ली-धनंजयः ।
सर्वग्रन्थार्थविदुषो(?)धर्मचन्द्रो गुणाग्रणीः ॥७॥
तच्छिष्योऽखिलसद्गुणौघजलधिर्मिथ्यातमार्को मुनि-
स्त्यक्ताशेषपरिग्रहो हरिशतैः पूज्यांह्रि······लालजः ।

तर्कव्याकरणादिशास्त्रसकलाम्भोराशिपारं गतो
भव्यांभोरुहपूर्णतिग्मकिरणः श्रीमान् प्रभाचन्द्रकः ॥८॥
सर्वसंघसमोपेतः विहरन्नेकदा स वै ।
समायातः सकीटाख्ये नगरे वैरिदुर्जये ॥९॥
यस्मिन्नुपासका बहवः जिनधर्मपरायणाः ।
सत्पात्रदानवन्तश्च गुरुपादाब्जषट्पदाः ॥१०॥
.........गृहे तत्र ध्वजापट्टादिशोभितं ।
नाभेयप्रतिबिम्बं यत्राभात्सुरनरार्हितं ॥११॥
तस्मिन् का ... यन् ... भिः प्रभाचन्द्रमुनीश्वरैः ।
स्वहृदि चिंतितं किंचित् क्रियते काव्यमुत्तमं ॥१२॥
एतत्सुगममस्माभिस्तत्त्वार्थसारटिप्पणं ।
शोधयंतु बुधाः किंचिद्यदि शासन-दूषितं ॥१३॥
अस्मिन्संवत्सरे विक्रमादित्यनृपतेः गते ।
चतुर्दशशतेऽतीते नवासीत्यद(शीत्यब्द)संयुते(१४८९) ॥१४॥
भाद्रपदे शुक्लपक्षे पंचमीवासरे शुभे ।
वारेऽर्के वैधृतियोगे विशाखाऋक्षके वरे ॥१५॥
तत्त्वार्थटिप्पणं भद्र प्रभाचन्द्रतपस्विना ।
कृतमिदं प्रबोधाय जैताख्यब्रह्मचारिणे ॥१६॥
यावद्धरिहरी व्योम्नि यावद्धरिः सुरालये ।
तावद्धर्मरतः श्रीमज्जैनसंघोऽभिनंदतात् ॥१७॥

इति श्रीमद्भट्टारकधर्मचंद्रशिष्यगणिप्रभाचन्द्रविरचिते तत्वार्थ-टिप्पणिके ब्रह्मचारिजैता-साधुहावादेवनामांकिते दशमोऽध्यायः समाप्तः ।

यस्तुर्यदानपरिपोषित ....।
श्रीमत्प्रभाशशियतीश्वर-पादलीनः पुत्रान्वितो भुवि स नंदतु हावसाधुः ॥

इति [तत्त्वार्थ-] सूत्रटिप्पणं समाप्तं ।

११८. गणितसार-संग्रह (महावीराचार्य)

आदिभाग :—

अलंघ्यं त्रिजगत्सारं यस्याऽनंतचतुष्टयं ।
नमस्तस्मै जिनेन्द्राय महावीराय तायिने ॥१॥
संख्याज्ञानप्रदीपेन जैनेन्द्रेण महत्विषा ।
प्रकाशितं जगत्सर्व्वं येन तं प्रणमाम्यहं ॥२॥
प्रीणितः प्राणिसस्यौघो निरीतिर्निरवग्रहः ।
श्रीमताऽमोघवर्षेण येन स्वेष्टहितैषिणा ॥३॥
पापरूपाः परा यस्य चित्तवृत्तिहविर्भुजि ।
भस्मसाद्भावमीयुस्तेऽवंध्यकोपो भवेत्ततः ॥४॥
वशीकुर्वन् जगत्सर्व्वं योऽयं नानुवशः परैः ।
नाऽभिभूतः प्रभुस्तस्मादपूर्व्वमकरध्वजः ॥५॥
यो विक्रमक्रमाक्रांतचक्रिचक्रकृतक्रियः ।
चक्रिकाभंजनो नाम्ना चक्रिकाभंजनोऽञ्जसा ॥६॥
यो विद्यानद्यधिष्ठानो मर्यादावज्रवेदिकः ।
रत्नगर्भो यथाख्यातचारित्रजलधिर्महान् ॥७॥
विध्वस्तैकांतपक्षस्य स्याद्वादन्यायवादिनः ।
देवस्य नृपतुंगस्य वर्द्धतां तस्य शासनं ॥८॥
लौकिके वैदिके चाऽपि तथा सामायिके च यः ।
व्यापारस्तत्रसर्वत्र संख्यानमुपयुज्यते ॥९॥
कामतंत्रेऽर्थशास्त्रे च गांधर्वे नाटकेऽपि वा ।
सूपशास्त्रे तथा वैद्ये वास्तुविद्यादिवस्तुषु ॥१०॥
छंदोऽलंकारकाव्येषु तर्कव्याकरणादिषु ।
कलागुणेषु सर्व्वेषु प्रस्तुतं गणितं पुरा ॥११॥
सूर्यादिग्रहचारेषु ग्रहणे ग्रहसंयुतौ ।

त्रिप्रश्ने चन्द्रवृत्तौ च सर्व्वत्राऽङ्गीकृतं हि तत ॥१२॥
द्वीपसागरशैलानां संख्या-व्यासपरिक्षिपः ।
भवनव्यंतरज्योतिर्लोककल्पाऽधिवासिनां ॥१३॥
नारकाणां च सर्व्वेषां श्रेणीबद्धेन्द्रकोत्करा ।
प्रकीर्णकप्रमाणाद्या बुध्यते गणितेन ते ॥१४॥
प्राणिनां तत्र संस्थानमायुरष्टगुणादयः ।
यात्राद्यास्संहिताद्याश्च सर्वे ते गणिताश्रयाः ॥१५॥
बहुभिर्विप्रलापैः किं त्रैलोक्ये सचराचरं ।
यत्किंचिद्वस्तु तत्सर्वं गणितेन विना न हि ॥१६॥
तीर्थंकृद्भ्यः कृतार्थेभ्यः पूज्येभ्यो जगदीश्वरैः ।
तेषां शिष्यप्रशिष्येभ्यः प्रसिद्धाद्गुरुपर्वतः ॥१७॥
जलधेरिव रत्नानि पाषाणादिव कांचनं ।
शुक्तेर्मुक्ताफलानीव संख्याज्ञानमहोदधेः ॥१८॥
किंचिदुद्धृत्य तत्सारं वक्ष्येऽहं मतिशक्तितः ।
अल्पग्रंथमनल्पार्थं गणितं सारसंग्रहं ॥१९॥

इति सारसंग्रहे गणितशास्त्रे महावीराचार्यकृतौ संज्ञाधिकारः समाप्तः ॥

अन्तभाग :—

कथमितिचेत् पको(एका)द्येकोतरंत्यगच्छेनागतधनमुत्तरेण गुणयित्वा गतः लब्ध त्रिभिर्भक्त्वा तस्मिनगच्छे एकमपनीय गुणयित्वा तस्मिन् लब्धे मेलयित्वागतलब्धं एकाद्येकोत्तरं गच्छधनं ॥छ॥ [बम्बई ऐ० प० स० भ० प्रति

[नोट—बम्बई सरस्वती भवनकी यह प्रति सं० १५७५ वैशाख सुदि नवमी शुक्रवारको लिखी हुई है और इसे मूलसंघी बलात्कारगणके आचार्य ज्ञानकीर्तिके प्रशिष्य तथा रत्नकीर्तिके शिष्य यशःकीर्तिने स्वयं अपने हाथसे लिखा है। प्रति प्रायः शुद्ध और सुन्दर है परन्तु जीर्ण है और अधूरी जान पड़ती है। अन्तमें समाप्तिसूचक संधि तथा मूलग्रन्थ-प्रशस्तिका कोई भाग नहीं है। ऊपरके अन्तिम भागके अनन्तर ही लेखकप्रशस्ति लगी हुई है।]

११९. पुराणसार (श्रीचन्द्र मुनि)

आदिभाग :—

नत्वादितः सकल[तीर्थं]कृतः कृतार्थान् सर्वोपकारनिरतांस्त्रिविधेन नित्यम् ।
वक्ष्ये तदीयगुणगर्भमहापुराणं संक्षेपतोऽर्थनिकरं शृणुत प्रयत्नात् ॥१॥

अन्तभाग :—

धारायां पुरि भोजदेवनृपते राज्ये जबाल्युत्तके:(?)
श्रीमत्सागरसेनतो यतिपतेर्ज्ञात्वा पुराणं महत् ।
मुक्त्यर्थं भवभीतिभीतजगता श्रीनन्दिशिष्यो बुधः
कुर्वे चारुपुराणसारममलं श्रीचन्द्रनामा मुनिः ॥१॥

श्रीविक्रमादित्यसंवत्सरे यशपूत्य(पंचाशीत्य ?)धिकवर्षसहस्रे (१०८५ ?) पुराणसाराभिधानं समासं ।

१२०. शान्तिनाथ-पुराण (भ० श्रीभूषण)

आदिभाग :—

सिद्धं सिद्धार्थसंसिद्धिदायकं भुवनेश्वरं ।
वन्दे सर्वगुणोपेतं प्रारब्धार्थप्रसिद्धये ॥१॥

× × × ×

रामसेनादयो नम्याः स्तुवेऽहं ज्ञानकोविदाः ।
पंचमे ज्ञानना(निनो)ऽतुल्याः दुर्मतध्वान्तनाशकाः ॥२४॥
नेमिसेनमुनीन्द्राय नमो नित्यं गुणात्मने ।
धर्माधर्मप्रदेशाय वादिने निष्कलात्मने ॥२५॥
अकलंककलाकम्रं न्यायमार्गविशारदं ।
वन्देऽहं दुर्मतध्वान्तनाशकं सूर्यसन्निभं ॥२६॥
वाक्यं समन्तभद्रस्य दधेऽहं चित्तकैरवे ।
येन सूर्यायते नित्यं हृदयाम्बुजकोषके ॥२७॥

स्तुवे माधवभट्टस्य वाक्यं सन्देहमर्दकं ।
येन जैनेन्द्रसिद्धान्तं दर्शितं भरतावनौ ॥२८॥
जीयाच्छ्रीजिनसेनश्च कविकोटिशिरोमणिः ।
अरीरचन्महाशास्त्रं पुराणं हरिवंशकं ॥२९॥
जिनसेनो लघुर्जीयात् पुराणरचने क्षमः ।
येन महापुराणाख्यमकरोद्विबुधाग्रणीः ॥३०॥
येन श्रीधर्मसेनेनाजीजयन्मकरध्वजः ।
विमलादिसेनको तावद्बभूव क्षितिविश्रुतः ॥३१॥
सार्थकोऽभूद्विशालश्चकीर्तिरुत्त[म]धारकः ।
तथा श्रीविश्वसेनश्च विश्वसेनो यथार्थवाक् ॥३२॥
विश्वसेनपदांभोजबोधनैकदिवाकरः ।
विद्याभूषणसूरीन्द्र(द्रो) जीयताज्जगतीतले ॥३३॥
श्रीवीरवदनोत्पन्नां नमामि शारदां वरां ।
अंगपूर्वादिसंभूतां गणेन्द्रशतधारिताम् ॥३४॥
चरित्रं शांतिनाथस्य वक्ष्येऽहं भक्तितो वरं ।
चक्रिणः स्वात्मरूपस्य रम्यं स्वस्याऽग्रहानये ॥३५॥

अन्तभाग :—

काष्ठासंघाख्यगच्छे विमलतरगुणे सारनंदीतटांके ।
ख्याते विद्यागणे वै सकलबुधजनैः सेवनीये वरेण्ये ।
श्रीमच्छ्रीरामसेनान्वयतिलकसमा नेमिसेनाः सुरेन्द्राः ।
भूयासुस्ते मुनीन्द्रा व्रतनिकरयुता भूमिपैः पूज्यपादाः ॥४५६॥
श्रीधर्मसेनो यतिवृन्दसेव्यः विराजते भूवलये नितान्तं ।
वैमल्यसेनोऽपि यथार्थनामा चारित्ररत्नाकर एव नित्यं ॥४५७॥
विशालकीर्तिश्च विशालकीर्तिर्जम्बूद्रुमाङ्के विमले सदैव ।
विभाति विद्यार्णव एक नित्यं वैराग्यपाथोनिधिशुद्धचेताः ॥४५८॥

श्रीविश्वसेनो यतिवृन्दमुख्यः विराजते वीतभयः सलीलः ।
स्वतर्कनिर्नाशितसर्वडिम्भो विख्यातकीर्तिर्जितमारमूर्तिः ॥४५६॥
तत्पट्टविद्यार्णवपारगंता जीयात्पृथिव्यां पृथुवृत्तवृत्तः ।
विद्याविभूषोऽपि यथार्थनामा विद्याविनोदेन च लब्धकीर्तिः ॥४६०
विद्याभूषणपट्टकंजतरणिः श्रीभूषणो भूषणो
जीयाज्जीवदयापरो गुणनिधिः संसेवितो सज्जनैः ।
काष्ठासंघसरित्पतिशशधरो वादी विशालोपमः
सद्वृत्तोऽकंधरो(?)ऽतिसुन्दरतरो श्रीजैनमार्गानुगः ॥४६१॥
संवत्सरे षोडशनामधेये एकोनसत्पष्ठियुते (१६५६) वरेण्ये ।
श्रीमार्गशीर्षे रचितं मया हि शास्त्रं च वर्षे विमलं विशुद्धं ॥४६२॥
त्रयोदशी सद्दिवसे विशुद्धं वारे गुरौ शान्तिजिनस्य रम्यं ।
पुराणमेतद्विमलं विशालं जीयाच्चिरं पुण्यकरं नराणाम् ॥४६३॥युग्मं ।
श्रीगूर्जरेऽप्यस्ति पुरं प्रसिद्धं सौजीत्रनामाभिधमेव सारं ।
श्रीनेमिनाथस्य समीपमाशु चकार शास्त्रं जिनभूतिरम्यं(?)॥४६६॥
अस्य शास्त्रस्य विज्ञेयाः श्लोकाः चतुःसहस्रकाः ।
पंचाविंशतिसंयुक्ता(४०२५) विज्ञेया लेखकैः सदा ॥४६७॥
इति श्रीशान्तिनाथ-पुराणे भट्टारकश्रीश्रीभूषणविरचिते शान्तिनाथ-समवसरणधर्मोपदेशमोक्षगमनवर्णनो नाम षोडशः सर्गः समाप्तः ॥१६॥

[बम्बई ऐ० प० स० भ० प्रति

१२१. वृषभदेवपुराण (भ० चन्द्रकीर्ति)

आदिभाग :—

..............................।
..............................॥

अन्तभाग :—

श्रीकाष्ठसंघेऽजनि रामसेनो नांदीतटांके नरदेवपूज्यः ।
तदन्वये संयमभारधारि-श्रीविश्वसेनो मुनिपो बभूव ॥६०॥

तत्पट्टे किल शास्त्रज्ञो विद्याभूषणसूरिराट् ।
योऽभवत्परमार्थेन प्रसिद्धोऽवनिमंडले ॥६१॥
तत्पट्टाचलभास्करो गुणनिधिः शास्त्राब्धिपारंगतः
श्रीश्रीभूषण एव गौतमनिभो गच्छाधिराजः कवि-
स्तत्पट्टे किल चंद्रकीर्तिमुनिपो भट्टारकाधीश्वर-
स्तेनेदं रचितं पुराणमतुलं नाभेयदेवस्य वै ॥६२॥
पुराणं वृषभेशस्य पवित्रं पापनाशनं ।
सज्जनान् प्रतिबोधाय निर्मितं चंद्रकीर्तिना ॥६३॥

इति श्रीत्रिभुवनैकचूडामणिश्रीमद्वृषभदेवपुराणे भट्टारकश्रीश्रीभूषण-पादपद्म-मधुकरायमान-भट्टारकश्रीचंद्रकीर्तिप्रणीते वृषभदेव-निर्वाणगमनो नाम पंचविंशतिपर्व ॥ समाप्तमिदं ॥

[बम्बई ऐ० प० स० भ० प्रति

१२२. सुभग-सुलोचना-चरित (भ० वादिचन्द्र)

आदिभाग :—

प्रणम्य शिरसाऽर्हन्तं स्फूर्जंतं ज्ञानतेजसम् ।
संचिताखिल-पापौघ-ध्वान्तध्वंसैककारणम् ॥१॥

अन्तभाग :—

विहाय पदकाठिन्यं सुगमैर्वचनोत्करैः ।
चकार चरितं साध्व्या वादिचन्द्रोऽल्पमेधसा ॥२॥
स्वस्ति [श्री]मूलसंघेऽस्मिन् पद्मनन्दीनमाश्रिताः ।
ते प्रपश्यन्ति सर्वान् [वै] किमत्राश्चर्यमद्भुतम् ॥३॥
देवेन्द्रस्त्वद्यशः पेतुः करैः धृत्वास्त्ववकीम् (?) ।
देवेन्द्रकीर्तिं ते वन्दे [द]मितानंगसद्बलम् ॥४॥
विद्यानंदो हि शिष्याणां यत्पुरः पठतापुर(?) ।
नंनमीमि त्रिशुध्या तं ध्यानं दिनश्कमाश्वरम् (?) ॥५॥

अपाकुर्वन्ति मतुलम्(?)मतामि[तो] मिथ्यादृशामिह ।
मानये मल्लिभूषात ····विनिमण्डपम्(?) ॥६॥
लक्ष्मीलाभो हि यद्वाण्या प्रत्य[ह] जायते नृणाम् ।
लक्ष्मीचन्द्रं च तं चाये लीलालभितपातकम् ॥७॥
वीरचन्द्रं समाश्रित्य के मूर्खा न विदो मथत् (?) ।
तं [श्रये] त्यक्तसर्वान्नं दीप्त्या निर्जितकांचनम् ॥८॥

इति भट्टारकश्रीवादिचन्द्रविरचिते सुभगसुलोचनाचरिते नवमः परिच्छेदः ।

१२३. षट्खण्डागम-टीका = धवला (वीरसेनाचार्य)

आदिभाग :—

सिद्धमणंतमणिंदियमणुवममप्पुत्थ-सोक्खमणवज्जं ।
केवल-पहोह-णिज्जिय-दुण्णय-तिमिरं जिणं णमह ॥१॥
बारह-अंगग्गिज्झा वियलिय-मल-मूढ-दंसणुत्तिलया ।
विविह-वर-चरण-भूसा पसियउ सुय-देवया सुइरं ॥२॥
सयल-गण-पउम-रविणो विविहद्धि-विराइया विणिस्संगा ।
णीराया वि कुराया गणहर-देवा पसीयंतु ॥३॥
पसियउ मह धरसेणो पर-वाइ-गयोह-दाण-वरसीहो ।
सिद्धंतामिय-सायर-तरंग-संघाय-धोय-मणो ॥४॥
पणमामि पुप्फदंतं दुकयंतं दुण्णयंधयार-रविं ।
भग्ग-सिव-मग्ग-कंटयमिसि- समिइ-वइं सया दंतं ॥५॥
पणमह कय-भूय-बलिं भूयबलिं केस-वास-परिभूय-बलिं ।
विणिहयबम्मह-पसरं वड्ढाविय-विमलणाण-बम्मह-पसरं ॥६॥

अन्तभाग :—

जस्स से(प)साएण मए सिद्धंतमिदं हि अहिलहुंदी(हुदं)
मह सो एलाइरिओ पसियउ वरवीरसेणस्स ॥१॥

वंदामि उसहसेणं तिहुवण-जिय-बंधवं सिवं संतं।
णाण-किरणावहासिय-सयल-इयर-तम-पणासियं दिट्ठं ॥२॥

अरहंतपदो (अरहंतो) भगवंतो सिद्धा सिद्धा पसिद्ध आइरिया।
साहू साहू य महं पसियंतु भडारया सव्वे ॥३॥

अज्जज्जणंदिसिस्सेणुज्जुव-कम्मस्स चंदसेणस्स।
तह णत्तुवेण पंचत्थूहण्णयभाणुणा मुणिणा ॥४॥

सिद्धंत-छंद-जोइस-वायरण-पमाण-सत्थ-णिवुणेण।
भट्टारएण टीका लिहिएसा वीरसेणेण ॥५॥

अट्ठ(ठ)तीसम्हि सासिय(सतसए) विक्कमरायंकिए सु-सगणामे।
वासेसु तेरसीए भाव(णु)विलग्गे धवल-पक्खे ॥६॥

जगतुंगदेव-रज्जे रियम्हि कुंभम्हि राहुणा कोणे।
सूरे तुलाए संते गुरुम्हि कुलविल्लए होंते ॥७॥

चावम्हि व(त)रणि-वुत्ते सिंघे सुक्कम्मि मीणे चंदम्मि*।
कत्तिय-मासे एसा टीका हु समाणिआ धवला ॥८॥

बोद्दणरायणरिंदे णरिंदचूडामणिम्हि भुंजंते।
सिद्धंतगंथमत्थिय गुरुप्पसाएण विगता सा ॥९॥

शब्दब्रह्मेति शाब्दैर्गणधरमुनिरित्येव राद्धान्तविद्भिः।
साक्षात्सर्वज्ञ एवेत्यवहितमतिभिस्सूक्ष्मवस्तुप्रणीतैः(वीणैः)
यो दृष्टो विश्वविद्यानिधिरिति जगति प्राप्तभट्टारकाख्यः।
स श्रीमान्वीरसेनो जयति परमतध्वान्तभित्तंत्रकारः ॥१०॥

(इसके आगे ग्रन्थमें कनडी प्रशस्ति है।)

इति श्रीधवलप्रशस्तिः।

---

* आगे पृष्ठ १८७ के नोटमें उल्लेखित आराकी उस प्रशस्ति-प्रतिमें 'मीणे चंदम्मि' ही पाठ है 'नेमिचंदम्मि' जैसा अशुद्ध पाठ नहीं।

१२४. कषायप्राभृत-टीका = जयधवला
(आचार्य वीरसेन, जिनसेन)

आदिभाग :—

जयइ धवलंगतेएणाऊरिय-सयलभुवणभवणगणो।
केवलणाणसरीरो अणंजणो णामओ चंदो ॥१॥
तित्थयरा चउवीस वि केवलणाणेण दिट्ठसव्वट्ठा।
पसियंतु सिवसरूवा तिहुवणसिरसेहरा मज्झं ॥२॥
सो जयइ जस्स केवलणाणुज्जलदप्पणम्मि लोयालोयं।
पुढ पदिबिंबं दीसइ वियसिय-सयवत्त-गब्भगउरो वीरो ॥३॥
अंगंगवज्झणिम्मी अणाइमज्झंतणिम्मलंगाए।
सुयदेवय-अंबाए णमो सया चक्खुमइयाए ॥४॥
णमह गुणरयणभरियं सुअणाणामिय-जलोह-गहिरमपारं।
गणहरदेवमहोवहिमणेय-णय-भंग-भंगि-तुंग-तरंगं ॥५॥
जेणिह कसायपाहुडमणेयणयमुज्जलं अणंतत्थं।
गाहाहि विवरियं तं गुणहरभट्टारयं वंदे ॥६॥
गुणहर-वयण-विणिग्गय-गाहाणत्थोवहारिओ सव्वो।
जेणज्जमंखुणा सो सणागहत्थी वरं देउ ॥७॥
जो अज्जमंखुसीसो अंतेवासी वि णागहत्थिस्स।
सो वित्तिसुत्तकत्ता जइवसहो मे वरं देउ ॥८॥

अन्तभाग :—

एत्थ समप्पइ धवलिय तिहुवणभवणुप्पसिद्धमाहप्पा।
पाहुडसुत्ताणमिमा जयधवला-सण्णिया टीका ॥१॥
सुअदेवयाए भत्ती सुदोवजोगो य भाविओ सम्मं।
आहवइ णाणसिद्धिं णाण-फलं चावि णिव्वाणं ॥२॥

णाणेण झाणसिद्धी झाणादो सव्व-कम्म-णिज्जरणं ।
णिज्जर-फलं च मोक्खो णाणब्भासं तदो कुज्जा ॥३॥
इय भावियूण सम्मं सुदणाणाराहणा मये एसा ।
चिरभाविदा भयवदी पसियउ सा मज्झमचिरेण ॥४॥
उज्जोइदा य सम्मं उज्जमिदा साहिदा य णित्थिण्णा ।
णिव्वूदा य भयवदी पसियउ सुअदेवया मज्झं ॥५॥
इति श्रीवीरसेनीया टीकासूत्रार्थ-दर्शिनी ।
वाटग्रामपुरे श्रीमद्गूर्ज्जरार्यानुपालिते ॥१॥
फाल्गुणे मासि पूर्वान्हे दशम्यां शुक्लपक्षके ।
प्रवर्धमान-पूजोरु-नन्दीश्वर-महोत्सवे ॥२॥
अमोघवर्षराजेन्द्र-प्राज्यराज्यगुणोदया ।
निष्ठिता प्रचयं यायादाकल्पान्तमनल्पिका ॥३॥
षष्ठिरेव सहस्राणि(६००००)ग्रन्थानां परिमाणतः ।
श्लोकानुष्टभेनात्र निर्दिष्टान्यनुपूर्वशः ॥४॥
विभक्तिः प्रथमस्कंधो द्वितीयः संक्रमोदयौ ।
उपयोगश्च शेषास्तु तृतीयस्कंध इष्यते ॥५॥
एकान्नषष्ठिसमधिक-सप्तशताब्देषु(७५९) शकनरेन्द्रस्य ।
समतीतेषु समाप्ता जयधवला प्राभृत-व्याख्या ॥६॥
गुर्जरनरेन्द्रकीर्तेरन्तःपतिता शशांकशुभ्रायाः ।
गुप्तेव गुप्तनृपतेः शकस्य मशकायते कीर्तिः ॥७॥
गुर्जरयशः पयोऽब्धौ निमज्जतीन्दौ विलक्षणं लक्ष्म ।
कृतमलि-मलिनं मन्ये धात्रा हरिणापदेशेन ॥८॥
भरत-सगरादि-नरपति-यशांसि तारानिभेन संहृत्य ।
गुर्जरयशसो महतः कृतोऽवकाशो जगत्सृजा नूनं ॥९॥
इत्यादिसकलनृपतीनतिशय्यपयःपयोधि-फेनेत्था ।
गुर्जरनरेन्द्रकीर्तिः स्थेयादाचन्द्रतारमिह भुवने ॥१०॥

जयत्यजय्यमाहात्म्यं विशासित-कुशासनं ।
शासनं जैनमुद्भासि मुक्तिलक्ष्म्यैक-शासनं ॥११॥
भूयादावीरसेनस्य वीरसेनस्य शासनं ।
शासनं वीरसेनस्य वीरसेनकुशेशयं ॥१२॥
आसीदासीदासन्न-भव्यसत्त्व-कुमुद्वतीम ।
मुद्वतीं कर्तुमीशो यः शशाङ्क इव पुष्कलः ॥१३॥
श्रीवीरसेन इत्यात्त-भट्टारक-पृथुप्रथः ।
पारदृश्वाधिविद्यानां साक्षादिव स केवली ॥१४॥
प्रीणित-प्राणि-संपत्तिराक्रान्ताऽशेषगोचरा ।
भारती भारतीवाज्ञा षट्खण्डे यस्य नाऽस्खलत् ॥१५॥
यस्य नैसर्गिकीं प्रज्ञां दृष्ट्वा सर्वार्थगामिनीम् ।
जाताः सर्वज्ञसद्भावे निरारेका मनीषिणः ॥१६॥
यं प्राहुः प्रस्फुरद्बोध-दीधिति-प्रसरोदयम् ।
श्रुतकेवलिनं प्राज्ञाः प्रज्ञाश्रमणसत्तमम् ॥१७॥
प्रसिद्ध-सिद्ध-सिद्धान्त-वार्धिवार्धौत-शुद्धधीः ।
सार्द्धं प्रत्येकबुद्धैर्यः स्पर्धते धीद्धबुद्धिभिः ॥१८॥
पुस्तकानां चिरन्तानां गुरुत्वमिह कुर्वता ।
येनातिशयिताः पूर्वे सर्वे पुस्तक-शिष्यकाः ॥१९॥
यस्तपोदीप्तकिरणैर्भव्याम्भोजानि बोधयन् ।
व्यद्योतिष्ट मुनीनेनः पञ्चस्तूपान्वयाम्बरे ॥२०॥
प्रशिष्यश्चन्द्रसेनस्य यः शिष्योऽप्यार्यनन्दिनाम् ।
कुलं गणं च सन्तानं स्वगुणैरुदजिज्वलत् ॥२१॥
तस्य शिष्योऽभवच्छ्रीमान् जिनसेनः समिद्धधीः ।
अविद्धावपि यत्कर्णौ विद्धौ ज्ञान-शलाकया ॥२२॥
यस्मिन्नासन्नभव्यत्वान्मुक्तिलक्ष्मीः समुत्सुका ।
स्वयंवरीतुकामेव श्रौतीं मालामयूयुजत् ॥२३॥

येनानुचरिता(तं) बाल्याद् ब्रह्मव्रतमखण्डितम्।
स्वयम्बरविधानेन चित्रमूढा सरस्वती ॥२४॥
यो नातिसुन्दराकारो न चातिचतुरो मुनिः।
तथाप्यनन्यशरणा यं सरस्वत्युपाचरत् ॥२५॥
धीः शमो विनयश्चेति यस्य नैसर्गिकाः गुणाः।
सूरीनाराधयंति स्म गुणैराराध्यते न कः ॥२६॥
यः कृशोऽपि शरीरेण न कृशोऽभूत्तपोगुणैः।
न कृशत्वं हि शारीरं गुणैरेव कृशः कृशः ॥२७॥
ये (यो) नाग्रहीत्कापलिकान्नाऽप्यचिंतयदंजसा।
तथाऽप्यध्यात्मविद्याब्धेः परं पारमशिश्रियत् ॥२८॥
ज्ञानाराधनया यस्य गतः कालो निरन्तरम्।
ततो ज्ञानमयं पिण्डं यमाहुस्तत्त्वदर्शिनः ॥२९॥
तेनेदमनतिप्रौढ-मतिना गुरुशासनात्।
लिखितं विशदैरेभिरक्षरैः पुण्यशासनम् ॥३०॥
गुरुणार्धे ऽग्रिमे भूरिवक्तव्ये संप्रकाशिते।
तन्निरीक्ष्याल्प-वक्तव्यः पश्चार्धस्तेन पूरितः ॥३१॥
प्रायः प्राकृतभारत्या क्वचित्संस्कृतमिश्रया।
मणि-प्रवाल-न्यायेन प्रोक्तोऽयं ग्रन्थविस्तरः ॥३२॥
ग्रन्थच्छायेति यत्किंचिदत्युक्तमिह पद्धतौ।
चन्तुमर्हथ तत्पूज्या दोषं ह्यर्थी न पश्यति ॥३३॥
गाथासूत्राणि सूत्राणि चूर्णिसूत्रं तु वार्तिकम्।
टीका श्रीवीरसेनीया शेषाः पद्धतिपंजिकाः ॥३४॥
ते सूत्रसूत्र-तद्वृत्ति-विवृती वृत्ति-पद्धती।
कृत्स्नाकृत्स्नश्रुतव्याख्ये ते टीकापंजिके स्मृते ॥३५॥
अत्युक्तं किमिहास्त्यनुक्तमथवा किं वा दुरुक्तादिकं
सर्वंशोदित-सूनृत-प्रवचने प्रस्पष्टमृष्टाक्षरे।

तत्सूत्रार्थ-विवेचने कतिपयैरेवाक्षरैर्माद्दशा-
मुक्तानुक्तदुरुक्तचिन्तमपरा टीकेति कः संभवः ॥३६॥
तत्पूर्वापरशोधनेन शनकैर्यन्माद्दशां टीकनं
सा टीकेत्यनुगृह्यतां बुधजनैरेषा हि नः पद्धतिः।
यत्किंचिच्च दुरुक्तमत्ररचितं छाद्मस्थ्य-दोषोदयात्
तत्सर्वं परिशोध्यमागमधनैर्ग्राह्यं च यन्निस्तुषं ॥३७॥
श्रीवीरप्रभु-भाषितार्थघटना निर्लोडितान्यगम-
न्यायाच्छ्रीजिनसेन-सन्मुनिवरैरादर्शितार्थस्थितिः।
टीका श्रीजयचिह्नितोरुधवला सूत्रार्थसंद्योतिनी
स्थेयादारविचन्द्रमुज्ज्वलतपःश्रीपालसंपादिता ॥३८॥
सर्वज्ञप्रतिपादितार्थगणभृत्सूत्रानुटीकामिमां
येऽभ्यस्यंति बहुश्रुताः श्रुतगुरुं संपूज्य वीरप्रभुं।
ते नित्योज्वलपद्मसेनपरमाः श्रीदेवसेनार्चिताः
भासन्ते रविचन्द्रभासिसुतपाः श्रीपालसत्कीर्तयः ॥३६॥

इति श्रीजयधवलप्रशस्तिः

[नोट—धवला और जयधवला टीकाओंकी ये दोनों प्रशस्तियां तात्या-नेमिनाथजी पांगल वार्सीने मूडबिद्रीमें गुरुवस्ति-स्थित श्रीसिद्धान्तशास्त्रों-परसे ता० ३० अगस्त सन् १६१२ को दिनके १०॥ बजेसे १२॥ बजे तकके समयके भीतर उतारकर जैनसिद्धान्तभवन आराको भेजी थीं। उसी प्रशस्ति-प्रतिपरसे अक्तूबर सन् १६२० में, इन्हें उद्धृत किया गया था। बादको सिद्धान्त शास्त्रोंके इधर आजानेपर सहारनपुर तथा आराकी ग्रन्थ-प्रतियों और मुद्रित प्रतिकी प्रस्तावना परसे इनका संशोधन किया गया है।]

१२५. आराधना-पताका (वीरभद्राचार्य)

आदिभाग :—

नियं-सुचरियगुण-माहप्पदिप्प-सुरराय-रिद्धि-वित्थारो।
जयइ सुरराय-पूइय-गुण-माहप्पो महावीरो ॥१॥

अन्तभाग :—

इय सुंदराइं वीरभद्दभणियाइं पवयणाहिंतो ।
चिरमुच्चिणि सुए एसा रइया आराहणापडिया ॥८५॥
वण्णाणमाणुपुव्वी गाहद्धपयाण पाययाणं च ।
कत्थइ कहिंचि रइया पुव्वपसिद्धाण समईए ॥८६॥
आराहणापसत्थंमि एत्थ सत्थंमि गंथ(थ)परिमाणं ।
नउयाइं नवसयाइं (६६०)अत्था गाहंमि गाहाणं ॥८७॥
विक्कमनिवकालाओ अट्ठुत्तरिमे समासहस्संमि (१००८) ।
एसा सव्वं गिहिआ गहिया गाहाहिं सरलाहिं ॥८८॥
मोहेण मंदमइणा इमंमि जमणागमं मए लिहियं ।
तं महरिणो मरिसिंतु अहवा सोहिंतु करुणाए ॥८६॥
भवगहणभमणरीणा लहंति निव्वुइसुहं जमल्लीणा ।
तं कप्पद्दुमसुहयं नंदउ जिणसासणं सुइरं ॥६०॥
[इति] आराधनापताका कृतिरियं श्रीवीरभद्राचार्यस्य ॥छ॥

१२६. रिष्ट-समुच्चय-शास्त्र (दुर्गदेव)

आदिभाग :—

पणमंत-सुराऽसुर-मउलि-रयण-वर-किरण-कंति-वित्थुरिअं ।
वीर-जिण-पाय-जुअलं णमिऊण भणेमि रिट्ठाइं ॥१॥

अन्तभाग :—

जयउ ... जियमाणो संजमदेवो मुणीसरो इत्थ ।
तह विहु संजमसेणो माहवचंदो गुरू तह य ॥२५४॥
रइयं बहु सत्थत्थं उवजीवित्ता हु दुग्गदेवेण ।
रिट्ठसमुच्चयसत्थं वयणेण [संजमाइ]देवस्स ॥२५५॥
जं इह किंपि वि रि(दि)ट्ठं अयाणमाणेण अहव गव्वेण ।
तं रिट्ठ-सत्थ-णिउणा सोहेवि महीइ पयडंतु ॥२५६॥

जो छद् सण-तक्क-तक्किय इमं पंचंग-सद्दागमे
जोगी सेसमहीसनीतिकुसलो वाइब्भकंठीरवो ।
जो सिद्धंतमपारती(णी)रसुणिही तीरे वि पारंगओ
सो देवो सिरिसंजमाइमुणिवो आसी इह भूतले ॥२५७॥
संजाओ इह तस्स चारुचरिओ णाणंबुधोयं मई
सीसो देसजई संबोहणपरो णीसेस-बुद्धागमो ।
णामेणं सिरिदुग्गदेव-विइओ वाणीसरा यन्नओ
तेणेदं रइयं विसुद्धमइणा सत्थं महत्थं फुडं ॥२५८॥
जा धम्मो जिणदिट्ठणिच्चयपवे(हे) वट्टंति जावज्जई
जा मेरू सुरपायवेहिं सरिसो जावं महीसा मही ।
जा णायं च सुरा णभोत्ति पहुणा चंदक्कताराणं
तावेत्थो महीफलंमि विदिट्ठं (?)दुग्गस्स सत्थं असो ॥२५६॥
संवच्छरइगसहस्से बोलीणे णवयसीइ-संजुत्ते (१०८६) ।
सावण-सुक्के यारसि दियहम्मि मूलरिक्खम्मि ॥२६०॥
सिरिकुंभणयरणए(?) लच्छिणिवास-णिवइ-रज्जम्मि ।
सिरिसंतिणाहभवणे मुणिभवियस्स उमे रम्मे(?) ॥२६१॥
इति रिट्ठसमुच्चयसत्थं सम्मत्तं ।

१२७. अर्घकाण्ड (दुर्गदेव)

आदिभाग :—

णमिऊण वड्ढमाणं संजमदेवं णरिंद-थुय-चलणं ।
वोच्छामि अग्घकंडं भवियाण हियं पयत्तेणं ॥१॥
वर-गुरु-परंपराए कमागयं एत्थ सयल-सत्थत्थं ।
दट्ठूण मणुयलोए णिदिट्ठं दुग्गदेवेण ॥२॥

अन्तभाग :—

आसी एत्थ महीयले सुविदिदो सत्थत्थ-पारं-गओ ।
णामेणं सिरि-संजमाइ-विबुहो वाइब्भगंधीयरो ॥१४३॥

सीसो तस्स धराधराणभिउ(भिणओ ?) सत्थत्थ-णिहिस्सणो
णामेणं सिरिदुग्गदेवसुकई चारित्तचूडामणी ।
कित्ती जस्स तिलोयमंडवणलं सड्डाइज(जा)णं(?)ट्ठिया
सव्वाणं सुहि-सत्थदं सुविदिदं तेणग्घकंडं कयं ॥
इदि सिरिदुग्गदेव-विरइयं अग्घकंडं समत्तं ।

१२८. परमागमसार (श्रुतमुनि)

आदिभाग :—

घाइ-चउक्क-विरहिया अणंत-णाणाइ-गुण-गण-समिद्धा ।
चंदक्क-कोडि-भासिद-दिव्वंगजिणा जयंतु जये ॥१॥
दस सहजादादिसया घायिक्खयदो दु संभवा दस हि ।
देवेहिं कयमाणा चोद्दस सोहंति वीरजिणे ॥२॥
दिव्वज्झुणी सु-दुंदहि छत्तत्तय सिंहविट्ठरं चमरं ।
राजंति जिणे वीरे भावलयमसोग कुसुमविट्ठी य ॥३॥
(आगे सिद्धादि पंचपरमेष्ठियोंकी स्तुति की गई है ।)
एवं पंचगुरूणं वंदित्ता भविय-णिवह-बोहत्थं ।
परमागमस्स सारं वोच्छे हं तच्च-सिद्धियरं ॥८॥
पंचत्थिकाय दव्वं छक्कं तच्चाणि सत्त य पदत्था ।
णव बंधो तक्कारण मोक्खो तक्कारणं चेदि ॥९॥
अहियारो अट्ठविहो जिणवयण-णिरूविदो सवित्थरदो ।
वोच्छामि समासेण य सुणुय जणा दत्तचित्ता हु ॥१०॥

अन्तभाग :—

जो परमागमसारं परिभावइ चत्त-रागदोसो हु ।
सो विरहिय-परभावो णिव्वाणमणुत्तरं लहइ ॥२२२॥
इदि परमागमसारं सुयमुणिणा कहियमप्प-बोहेण ।
सुदणिउणा मुणिवसहा दोसचुदा सोहयंतु फुडं ॥२२३॥

सगगा(का)ले हु सहस्से बिसय-तिसट्ठीगदे(१२६३) दु विलवरिसे ।
मग्गसिर-सुद्धसत्तमि गुरुवारे गंथ संपुण्णो ॥२२४॥
अणुवद-गुरु-बालेंदू महव्वदे अभयचंदसिद्धंति ।
सत्थेऽभयसूरि-पभा(हा)चंदा खलु सुयमुणिस्स गुरू ॥२२५॥
सिरिमूलसंघ-देसियगण-पुत्थयगच्छ-कोंडकुंदाणं ।
परमण्ण-इंगलेसर-बलिम्मि जादस्स मुणिपहाणस्स ॥२२६॥
सिद्धंताहयचंदस्स य सिस्सो बालचंदमुणिपवरो ।
सो भविय-कुवलयाणं आणंदकरो सया जयउ ॥२२७॥
सद्दागम-परमागम-तक्कागम-णिरवसेसवेदी हु ।
विजिद-सयलण्णवादी जयउ चिरं अभयसूरिसिद्धंति ॥२२८॥
णय-णिक्खेव-पमाणं जाणित्ता विजिय-सयल-परसमओ ।
वरणी(णि)वइ-णिवह-वंदिय-पय-पम्मो चारुकित्तिमुणी ॥२२९॥
वरसारत्तयणी(णिउ)णो सुद्धप्परओ विरहिय-परभावो ।
भवियाणं पडिबोहण-परो पहाचंदणाममुणी ॥२३०॥

[इति] श्रीमत्श्रुतमुनि-विरचित-परमागमसारः समाप्तः ।

[बम्बई ऐ० प० स० भ० प्रति

१२६. भावसंग्रह (श्रुतमुनि)

आदिभाग :—

खविदघणघाइकम्मे अरहंते सुविदिदत्थ-णिवहे य ।
सिद्धट्ठगुणे सिद्धे रयणत्तयसाहगे थुवे साहू ॥१॥
इदि वंदिय-पंचगुरू सरूवसिद्धत्थ भवियबोहत्थं ।
सुत्तुत्तं मूलुत्तर-भावसरूवं पवक्खामि ॥२॥

अन्तभाग :—

इदि गुणमग्गणठाणे भावा कहिया पबोह-सुयमुणिणा ।
सोहंतु ते मुणिंदा सुयपरिपुण्णा दु गुणपुण्णा ॥११६॥

(इसके बाद 'अणुबदगुरुबालेंदू' से लेकर 'णय-णिक्खेव-पमाणं' तक ५ गाथाएं वे ही हैं जो परमागमसारकी प्रशस्तिमें पृ० १६१ पर दर्ज हैं।)

णाद-णिखिलत्थ-सत्थो सयल-णरिंदेहिं पूजिओ विमलो।
जिण-मग्ग-गमण-सूरो जयउ चिरं चारुकित्तिमुणी ॥१२२॥
वर-सारत्तय-णिउणो सुद्धं परओ विरहिय-परभाओ(वो)।
भवियाणं पडिबोहणपरो पहाचंदणाममुणी ॥१२३॥

[नोट—आराके जैनसिद्धान्त-भवनकी ताड़पत्रीय प्रतिमें ११६ वीं गाथाके बाद 'इतिभावसंग्रहः समाप्तः' लिखकर अन्तकी ये ७ गाथाएं प्रशस्तिरूपसे दी हैं, जब कि मा० ग्र० मा० के 'भावसंग्रहादि' ग्रन्थमें 'भावत्रिभंगी'के नामसे संग्रहीत इस ग्रन्थमें वे नहीं पाई जातीं।]

१३०. आयज्ञानतिलकसटीक (भट्ट वोसरि)

आदिभाग :—

नामिऊण नमियनमियं दुत्तरसंसारसायरुत्तिन्नं।
सव्वन्नं वीरजिणं पुलिंदिणिं सिद्धसंघं च ॥१॥
जं दामनन्दिगुरुणो मणयं आयाण जाणि [यं] गुज्झं।
तं आयनाणतिलए वोसरिणा भन्नए पयडं ॥२॥ (मूल)

सिद्धान्ध्वजादिचिरसूत्रितनामधेयान् सर्वाङ्गसौहृदशुभस्थितिसौम्यपातान्।
स्वस्वामिसद्ग्रहयुतेक्षित-फुल्लपूर्णानायान्प्रणम्य बलिनः शुभकार्यसिद्ध्यै ॥१

शर्वाय शास्त्रसारेण यत्कृतं जनमंडनं।
तदायज्ञानतिलकं स्वयं विव्रियते मया ॥२॥ (स्वो० टीका)

अन्तभाग :—

विमलविहूसियदेहो जो नग्गाइ(?)माणुसो थुइ पढइ।
स पुलिंदिणि धाणइ सया आयाणं तस्स तत्ताणं ॥५॥ × × ×

इति श्रीदिगम्बराचार्य-पंडितश्रीदामनंदि-शिष्य-भट्टवोसरि-विरचिते सायश्रीटीकायज्ञानतिलके चक्रपूजाप्रकरणं समाप्तं ॥२५॥

१३१. अध्यात्मतरङ्गिणी-टीका (गणधरकीर्ति)

आदिभागः—

शुद्धध्यानकृशानुधूमनिवहः स्वासैभू शं कुंचितो
मौलौ नीलविलोलमूर्ध्वजजटाव्याजेन येषां बभौ ।
ज्ञानानन्ददृगात्मकामरकतस्त्रग्गौंदुमद्विद्रुमा—
नीलांभोदनिभा भवन्तु सुजिनास्ते स्वात्मलम्भाय नः ॥१॥

विचित्रोरुदेहद्यु तिद्योतिताशा नरेन्द्रोद्धकोटीररत्नप्रभाभा—
रभूयिष्ट पाथः प्रधौतांह्रिप्रयुग्मा जिनाः संददन्तां फलं वांछित नः ॥२॥

अरूशरसापीमविज्ञानदेहाऽशरीराः परानन्तवीर्यावगाहा—
